B. No
133
4

Vikul Sahas Bhashyam

विष्णुसहस्र नामभाष्यम्

श्रीशंकराचार्य प्रणीतम्

श्रीः। विश्वं भूतं भुवनं चित्रं बहुधा जा-
तं जायमानं च यत्। सर्वो ह्येष रुद्रस्त-
स्मै रुद्राय नमो अस्तु।

श्रीगणेशाय नमः। ब्रह्मपुराणे ब्रह्मनारदसंवादे त्र्यधिकशतत-
माध्याये १०३ गोदावरीमहानदीमाहात्म्यं। तत्राध्यायानुक्र-
मो लिख्यते। दैवासुरमानुषार्षभेदेन तीर्थचातुर्विध्यं

१ तीर्थभेदवर्णनं
२ गंगोत्पत्तिकार
णीभूतशंभुविवाहः
३ त्रिजगत्पावनेश
क्रिमहेनाभिमंत्रित
गंगारूपजलपूरितकमंडलु
प्रदानं च [illegible] शंभुना कृत
४ वामनावतारे श्रीविष्णुपादः
सत्यलोकं गतस्तेन ब्रह्म-
णा क्षालितस्तत्क्षालनोदकं
[illegible] वनादिक्षत्र
क्षिप्तं [illegible] शंभुना [illegible]
टासु धृतं
५ तज्जटास्थगंगोदकं तपसा शं
करं प्रतोष्य गौतमेनर्षिणाहृतः
क्षपार्थं ब्रह्मगिरौ महर्षिणानी
६ तं गोदावरी गंगा भगीरथेनै
कः प्रवाह आनीतः स भागीरथी
७ ब्रह्मगिरिमूर्ध्नि त्र्यंबकेशाय
भर्वस्तद्दरेण क्षेत्रानिरेपेक्षं सर्व
त्रापि गोदावरी प्राशस्त्यकथनं
८ भागीरथ्यानयनकारणीभूत
सगराख्यानं तत्र विंध्यदक्षिण
गा गोदावरी नाम्नी गंगा विंध्योत्त
रगा भागीरथी नाम्नी गंगेति एक
स्या एव गंगाया नामभेदः
९ अथ गंगागततीर्थानि तत्र ब्रह्म
गिरिमूर्ध्नि त्र्यंबकं तीर्थं गिरेर
धः आविर्भूता [illegible] सहतीर्थं
[illegible]

धृ कः श्लो को धार्तराष्ट्रोन्वह दुर्योधनस्यचा
द्वात्रिंशत् ३२ संजयप्रोक्ता वेदाष्टौ ८४ अर्जुनस्यतु।
१७१ वेदसप्तेषवः श्लोकाः ५७४ श्रीकृष्णेन समी
रिताः। एवं श्रीभगवद्गीतास्थश्लोकाः सप्तशतानि तु।
वेदव्यासेन मुनिना मध्ये भारतमीरिताः। २।
धृतराष्ट्र श्लोकः १
संजयोक्ताः श्लो ३२
दुर्योधनोक्त श्लो ९
अर्जुनोक्त श्लो ८४
श्रीमद्भगवदुक्त श्लो ५७४
७००

बलावद्रूपानघादि। अनुक्रमण
[illegible]
[illegible] वर्जितं। [illegible]
[illegible] १। [illegible]
[illegible] साधकः।
[illegible] मुमुक्षुर्न [illegible] परमार्थ
ता। २। इति।

अथैकादशस्कंधे सप्तमेऽध्या
ये यदुं प्रत्यवधूतेनचोक्ताः।
पृथिवी १ वायुः २ आकाशः ३
आपो ४ अग्निः ५ चंद्रमा ६ रविः
७ कपोतो ८ अजगरः ९ सिंधुः १०
पतंगो ११ मधुकृत् १२ गजः १३
मधुहा १४ हरिणो १५ मीनः
१६ पिंगला १७ कुररो १८ अर्भ
कः १९ कुमारी २० [illegible]
२१

[illegible]

[illegible] अपनगागनु [illegible]
[illegible] ऋषि त्र्यंबकं तीर्थं गिरेर
[illegible] आविर्भाव [illegible] शहतीर्थं
१० [illegible] कुशावर्ततीर्थं [illegible]
११ गुरुदाराभिगमनदोषह[illegible] मारतीर्थं
१२ कृत्तिकातीर्थं
१३ दशाश्वमेधतीर्थं
१४ पैशाचतीर्थवर्णनं
१५ क्षुधातीर्थवर्णनं
१६ अहिल्यासंगमंतीर्थं तदेवेंद्रतीर्थं
१७ नासिकापरनामकजनस्थान तीर्थं
१८ जनस्थानेअरुणावरुणानद्योः संगमः प्राच्याः सरस्वत्यानद्याश्च संगमः पंचवटीनिकटे अश्वतीर्थपरनामभा[illegible]नुतीर्थं अरुणावरुणामध्ये त्रयोदशसहस्रतीर्थानि ब्रह्महत्याविनाशकानि
१९ [illegible] तीर्थवर्णनं
२० गोवर्धनतीर्थवर्णनं
२१ पापप्रणाशनंतीर्थं तदेव धौतपापंनाम
२२ गालवतीर्थं विश्वामित्रतीर्थं
२३ श्वेततीर्थं
२४ शुक्रतीर्थं तदेव मृतसंजीवनतीर्थं
२५ पुण्यासिक्तानद्योः संगमे इंद्रतीर्थं
२६ पौलस्त्यतीर्थं
२७ अग्नितीर्थं
२८ ऋणमोचनतीर्थं

[illegible] कु [illegible] १८ [illegible]
[illegible] १९ कुमारी २ [illegible]
२५
[illegible] २२ [illegible]
सुपेशा [illegible] एवमेतु
[illegible] थनुर्थिं [illegible]
[illegible] ॥ [illegible]
[illegible]
॥ इति ॥

श्रीः

सुवर्णभारपरिमाण संख्या लिख्यते भागवतव्याख्या श्रीधरी शाह ।

	गुंजा	अष्टगुंजो माषक इकः ।	द्वादश माषको वा : माष
१ चतुर्भिर्व्रीहिभिर्गुंजा	१		
पंचगुंजात्मकः पणः	५	०	०
पणाष्टकं धरणः	४०	५	०
धरणाष्टकं कर्षः	३२०	४०	३६४
कर्षचतुष्टयं पलं	१२८०	१६०	१३६४
पलशतं तुला	१२८०००	१६०००	११३३६४
विंशतिस्तुला भारः	२५६००००	३२००००	२६६६६८
ऐकस्मिन्भारे शेर तोळे माषा :	८६१३६२६६ ८	भाराष्टकसुवर्णं प्रत्यहं स्पर्शनकर्मणि	८
			अशीतिसहस्त्रलक्षपंच
भाराष्टकेसुमण शेर तोळ माषा :	६८६१०४६ २०८६ ६४		शेराः तोळाः माषा
वर्ण			३३३६२६६८
संकलनायां भाराष्टके मण	शेर	तोळ	माषा :
६६	२६	५३	४
			चौदारिंशत्कोटरहस्त्र मणः शेर तो. मा.
			८६१२२६६८

अथकृष्णवस्यो हृदीकस्य चत्वारः पुत्राः

१ देवमीढः । २ देवबाहुः । ३ शतधनुः । ४ कृतवर्माचेति

२ तत्तः शूरः ।	
३ शूरस्य वसु देवसुखादयः पुत्राः पृथादयः पंचकन्याः कृष्णपितृष्वसारः	अथ पृथाद्याः पंच वसुदेवभगिन्यः
	१ पृथा सैव कुंतिनापोषितत्वात्कुंती पांडुपत्नी पांडवमाता
	२ श्रुतदेवा कारूषवृद्धशर्मपत्नी दंतवक्रमाता
	३ श्रुतकीर्तिः केकयधृष्टकेतुपत्नी तत्पुत्राः संतर्दनादयः पंच
४ वसुदेवो हि श्रीकृष्णपिता कृष्णाग्रजः श्रीकृष्णोऽसौ देवक्यां सुभद्रा कन्या अर्जुन भार्याभिमन्युमाता	४ राजाधिदेवी अवंत्यजयसेनपत्नी तत्पुत्रौ विंदानुविंदौ मित्रविंदानाम्नी एका कन्या श्रीकृष्णभार्या राक्षसविधिना अवंतीपुरीतो हृता
	५ श्रुतश्रवा चेदि दमघोषपत्नी यस्याः पुत्रः शिशुपालः इति शूरकन्याः पंच वसुदेवभगिन्यो भूता
	अथ देवमीढादिचतुष्पूर्वजस्य हृदीकस्य सप्त पुत्राः
	१ भजमानः । २ भजिः । ३ दिव्यः । ४ वृष्णिः । ५ देवावृधः । ६ अंधक । ७ महाभोजः

श्रीकृष्णपत्न्यः

१ रुक्मिणी प्रद्युम्नमाता

२ जांबवती

३ सत्यभामा

४ कालिंदी

३ दे [illegible] जनतया
४ कालिंदीसू
र्यतनया
५ नग्नजितो
सत्यतनया
सत्या।
६ आवंत्यनृपते
नपत्न्याः सदि
नु [illegible] सुराज्ञा
धिदेव्याः कन्या
मित्रविंदा
७ केकयदेशाधिपत्य
[illegible] पत्न्याः श्रुत
कीर्तिनामकस्य
पितृष्वसुः सुता
भद्रा
८ मद्रदेशाधिप [illegible]
तिसुता लक्ष्म
णा
इत्यष्टौ श्रीकृष्णम
हामहिष्यः।
अथ कामरूपाख्य
[illegible]
नामकपुरपुलिंगो
माभूरिहबातेन स्वयि
वालार्थं [illegible] रहीनाको
उशीस्त्रं रत्नाकन्याः स्व
यंभगनाविवाहिताः।

२१८

विष्णुसहस्रनामभाष्यारंभः

133/H

भगवत्पादश्रीशंकराचार्यप्रणीत
विष्णुसहस्रनामभाष्यप्रारंभः ।।
तत्रादावुपोद्घातग्रंथ एकविंशति
तमपत्रंपर्यंतं २१ । अथनामव्याख्या
रंभपत्रं २१ एकविंशतितमपत्रांतःपृष्ठं
द्वितीयशतकारंभपत्रं ४२ । तृतीयशतका
रं० ५० । चतुर्थशतका० ५[illegible]

श्रीमद्विघ्नराजायनमः॥ श्रीमच्छंकराचार्येभ्योनमः॥
श्रीमद्विठ्ठलेनमः॥सच्चिदानंदरूपायकृष्णायक्लिष्टकर्म
णे॥नमोवेदांतवेद्यायगुरवेबुद्धिसाक्षिणे॥१॥यस्म
स्मरणमात्रेणजन्मसंसारबंधनात्॥विमुच्यतेनम
स्तस्मैविष्णवेप्रभविष्णवे॥२॥कृष्णद्वैपायनंव्यासंस
र्वभूतहितेरतं॥वेदाब्जभास्करंवंदेशमादिनिलयं
मुनिं॥३॥सहस्रमूर्तेःपुरुषोत्तमस्यसहस्रनेत्रानपाद
बाहोः॥सहस्रनामस्तवनंप्रशस्तंनिरुच्यतेजन्मजरादि
शांत्यै॥४॥श्रीवैशं॥श्रुत्वेति॥धर्मानभ्युदयनिश्रेयसो
त्पत्तिहेतुभूतान्वेदलक्षणा॥नशेषणकार्त्स्न्येनपावना

वरूपस्य च ज्ञानमात्रेणानंदलक्षणो मोक्षः प्राप्येतेय
द्विद्वान्न बिभेति। कुतश्चनेति। यत्र विकल्पन विद्यते।
पुनर्भवः। यस्य वेदनात्तदेव भवतीयद्धिहायपरः
पंथा नृणां नास्ति। तदुक्तं। एकं परायणं च लोके पस
किमिति॥ द्वितीयप्रश्नः। कं कतमं देवं स्तुवंतः
२ गुणसंकीर्तनं कुर्वंतः कं कतमं देवमर्चयंतः। बाह्य
माभ्यंतरं स्वार्चनं बहुविधं कुर्वंतश्च मानवा नृसुलभं
कल्याणं स्वर्गापवर्गादिफलं प्राप्नुयुर्लभेयु रि
ति॥ पुनः प्रश्नः। द्वयं को धर्मः इत्यादि फलं लक्षणः
धारणा धर्म इति सर्वधर्माणां सर्वेषां धर्माणां मध्ये
भवतः परमः प्रकृष्टो मतः अभिप्रेत इति पंचमः

प्रश्नः। किं जपन्मुच्यते जपांशु मानस लक्षणं जपं कुर्वन्।
जंतुर्जन्मन धर्मा अनेन जंतुरादून जपार्चनस्नानादि
षु यथायोग्यं सर्वप्राणिनामधिकारोस्तीति सूचयति॥
जन्मसंसारबंधनात् जन्माज्ञानविजृंभितानामवि
या [illegible]कार्यणामुपलक्षणं। संसारः अविद्या ताभ्यां जन्म
संसाराभ्यां यद्बंधनं तस्मान्मुच्यते मुक्तो भवतीति षष्ठः
प्रश्नः॥ जन्मसंसारबंधनादिति दमुपलक्षणमितरे
षां फलानामपि एतत्ग्रहणं मोक्षस्य प्राधान्यख्याप
नार्थं॥ ॥ भीष्म उवाच॥ सर्वेषां शत्रूणां भयहेतुर्भीष्मो
मोक्षधर्मादीनां प्रवक्ता सर्वेषां प्रश्नानां कथितान्यो त्तः
सः

जप्यविशेषस्थः परः प्रश्नोनेन श्लोकेन परिह्रियते ॥
जगत्प्रभुमिति ॥ जगज्जंगमाजंगमात्मकं तस्य प्रभुः ॥
स्वामीतं देवदेवं देवानां देवमनंतं देशतः कालतो वस्तु
तश्चापरिच्छिन्नं पुरुषोत्तमं क्षराक्षराभ्यां कार्यकारणा
भ्यां शिलानित्याभ्यां मुत्तमं नामसहे
3 स्रणनाम्नां सहस्रेण स्तुवन् गुणान् संकीर्तयन् सततो
त्थितः निरंतरमुद्युक्तः पुरुषः पूर्णत्वात्पुरि शरीरे श
यनाद्वा पुरुषः सर्वदुःखातिगो भवेदिति सर्वत्र सं
बध्यते ॥ उत्तरश्लोकेन चतुर्थः प्रश्नः परिह्रियते ॥
[illegible] तमेव चार्चयन्वाद्यमौनं कुर्वन् नित्यं निरंतरं सर्वे

निपापक्षयकारीणि सर्वशः सर्वप्रकारैः श्रुत्वा धर्मपु
त्रो युधिष्ठिरं शांतनवं शांतनुसुतं भीष्मं सकलपुरुषा
र्थसाधनं सुखसंपाद्यमनुत्कमिति कृत्वा पुनरेवाभ्य
र्च्याभ्यभाषत प्रश्नं कृतवान् ॥ युधिष्ठिर उवाच ॥ ॥
किमेकं दैवतमित्यादि दैवतं देवते इत्यर्थः ॥ स्वार्थे त
तविधानात् ॥ लोके लोकन हेतुभूतसमस्तविद्यास्था
ने [illegible] पदाश्रयार्वसे [illegible] तसर्वेषां किं वाप्येकं पराय स्थिती
णं ॥ अस्मिंल्लोके एकं परायणं च किं परमयनं प्राप्तव्यं
परायणं यस्मान्निरीक्षिते ॥ भिद्यते हृदयग्रंथिश्छिद्यं
ते सर्वसंशयाः ॥ क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परा

वबोधेनसाक्षात्पश्यतीति लोकाध्यक्षःतं [नि] निरंतरं
स्तुवन्सर्वदुःखातिगोभवेदिति॥त्रयाणांसाधारणं
फलवचनंसर्वाध्यात्मिकादीनिदुःखान्यतीत्य
४ ती गच्छतीतिसर्वदुःखातिगःस्यात्॥पुनरपितमेवस्तु
त्यंविशिनष्टि॥विशेषोक्तिंकरोति॥ब्रह्मण्यंब्रह्मणे
स्त्रेब्राह्मणायतपसेश्रुतयेहितं॥सर्वधर्मान्जाना
तीतिसर्वधर्मज्ञः सर्वलोकानांप्राणिनांभक्तानांकी
र्त्तयः यशांसिताः स्वशक्त्यनुप्रवेशेनवर्धयतीतिलो ति
प्रार्थ्यते कैर्नाथ्यतेलोकानुपतपतीतियः आशास्तेलोकाना
मीश इतिलोकनाथंमहद्भूतंब्रह्मविश्वोत्कर्षेणवर्त्तमा

नत्वात्स्वभूतंपरमार्थसत्यंस्वतःसिद्धंसर्वभूतानां
ब्रह्मादीनांभवः संसारोयत्सकाशादुद्भवतीति॥पंच
मःप्रश्नः॥सर्वेषांवेदलक्षणानांधर्माणांमध्ये णां
एषवक्ष्यमाणोधर्मोधिकतमोममतोभिप्रेतः यद्भ म
क्त्यात्तत्परेणपुंडरीकाक्षंहृदयपुंडरीकेप्रकाशमानं
वासुदेवंस्तवैर्गुणसंकीर्तनलक्षणादिभिःस्तुतिभि
रर्चयेत्॥सत्कारपूर्वकमर्चनंकरोति।नरोमनुष्यो
पिदेषधर्मः इतिसंबंधः अस्यस्तुतिलक्षणस्याधि ३
क्येकिंकारणमुच्यतेहिंसादिपुरुषांतरद्रव्यांतरदेश
कालादिनियमानपेक्षत्वादाधिक्यकारणं॥ध्यायन्स्त

तेजज्ञन्यज्ञेस्मोत्तायांद्वापरेर्चयन् ॥यदाप्नोतित्तदाप्नो
तिकलोसंकीर्त्यकेशवमितिविष्णुपुराणवचनमपि
प्रत्यये सर्वधर्माणांधर्मो ॥ धितमोमत इत्यकूं ॥
द्वितीयप्रश्नंसमाधत्ते परमंप्रकाशीमहत्तरबृहत्त
ज्योतैतन्यलक्षणं सर्वावभासकं ॥येनसूर्यस्तपतित
जसेद्धस्तेद्धवाज्योतिषांज्योतिः ॥नतत्रसूर्योभाति
नचंद्रतारकंनेमाविद्युतः कुतोयमाग्निर्भातीत्यादि
श्रुतेः ॥यदादित्यगतंतेजइतिस्मृतेश्च ॥परमंत
पस्तपत्याज्ञापयतिय इमंचलोकंपरंचलोकंसर्वा
णिभूतानियोंतरोयमयतीत्यादिंतयमिब्राह्मणेसर्वे

षुकालेषु भक्त्याभक्तिर्जानत्वात्संयंतया पुरुषमव्ययं
विनाशविक्रियारहितंध्यायन्नाभ्यंतरार्चनंकुर्वन् स्तुव
न्पूर्वोक्तंनमस्यन्नमस्कारंकुर्वन्पूजाशेषभूतमुभयं
स्तुतिनमस्कारलक्षणंयजमानः पूजकःपूजाफलमश्नुय ‍सोता
वार्चयन्नित्यनेनोभयमर्चनमुच्यते ॥ ध्यायन्स्तुवन्नमस्य
का न्नितिमानसंवाचिकंकायिकंचोच्यते ॥तृतीयप्रश्नंपरिहर
ति ॥उत्तरैः ॥स्त्रिभिः पादैः अनादिनिधनंषड्भाव विका
रवर्जितंव्यापनशीलंसर्वलोकपतेरितिदृश्य
वर्गोलोकस्तस्यनियंतॄणांब्रह्मादीनामपीश्वरत्वाच्च
सर्वलोकमहेश्वरं ॥सलोकेदृश्यवर्गस्वभाविकेना

६

पूजितः संस्मृतः प्रणतः सर्वान्पापानुन्मूलयतीति
परमं पवित्रं संसारबंधहेतुभूतं पुण्यापुण्यात्मकं क
र्मतत्कारणं वाज्ञानं सर्वं नाशयन्स्वयाथार्थ्यज्ञाने
नेति वा पवित्राणां पवित्रं ॥ यन्नामकीर्तनं ॥ भक्त्या
विलापेन मनुत्तमं ॥ मैत्रेयाशेषपापानां धातूना
मिव पावकः ॥ प्रवशेनापि यन्नाम्नि कीर्तिते सर्व
पातकैः पुमान्विमुच्यते सद्यः सिंहत्रस्तैर्मृगैरिव ॥
शमायालं जलं वह्नेस्तमसो भास्करोदयः ॥ शांतिः
कलेरघौघस्य नामसंकीर्तनं हरेः ॥ स्तुत्वा देवं
वासुदेवं विपापो जायते नरः ॥ विष्णोः संपूजना

न्नित्यं सर्वपापं प्रणश्यति ॥ कृत्वा वत्रापि दोषा
द्यैः विषयासक्तमानसः कृत्वापि सकलं पापं गो
विंदं संस्मरन्शुचिः ॥ लोकत्रयाधिपतिमप्रतिमप्रभाव हिमश
मीषत्प्रणम्य शिरसा प्रभविष्णुमीशं ॥ जन्मांतरप्रल
यकल्पसहस्रजातमाशु प्रणाशमुपयाति नरस्य
पापं ॥ शाठ्येनापि नमस्कारः प्रायश्चित्तान्यशेषाणि
तपःकर्मात्मकानि वै ॥ यानि तेषामशेषाणां कृष्णा
नुस्मरणं परं ॥ ध्यायेन्नारायणं देवं स्नानादिषु च
कर्मसु ॥ प्रायश्चित्तं हि सर्वस्य दुष्कृतस्येति वै श्रुतिः ॥

संसारसर्पसंदष्टनष्टचेष्टैकभेषजं॥कलेर्दोषविवे
ष्ठवंमंत्रंश्रुत्वामुक्तोभवेन्नरः॥सर्वदा सर्वकार्ये
षुनास्तितेषाममंगलं॥येषांहृदिस्थोभगवान्मं
गलायतनंहरिः॥नित्यंसंचिंतयन्नेवं योगयुक्तो
जनार्दनं॥साहिरक्षापरंमन्यको हिनस्त्यच्युता
१ तु श्रयान्॥ पमारोगमथेश्विभोगांश्चैवानुषंगि
कान्॥ददातिध्यायतांनित्यो हृदि॥समुत्सृज्या
खिलांश्चिंतां सोच्युतः किंनचिंत्यते॥गंगास्नान
सहस्रेषुपुष्करस्नानकोटिषु॥यत्पापंविलयंया

७ नित्यमपवर्गप्रदो हृदि: चिंतस्मानः स्म
मत्स्यानां केशानां हो ७

नियंतृत्वंश्रूयते॥भीषास्माद्वातः पवते इत्यादिश्चतपती
ष्ट इतिश्चतपः॥अश्चैस्यैर्थैमनन छिन्नमितिमहत्वंतेषस
र्वेश्वर इतिश्रुतेः॥परमंसत्यादिलक्षणं॥परब्रह्ममह
नीयतयामहत्परमंप्रकृष्टंपुनरावृत्तिरोकावर्जितं॥
अयनंपरमगहणात्॥सर्वत्रापरतेजः॥आदित्यादि
कं व्यांच्च इति॥सर्वत्रयोदेवइतिविज्ञेष्यते॥योदेवःप
रमंतेजःपरमंतपःपरमंब्रह्मपरमंपरायणं॥सएकः
सर्वभूतानांपरायणमितिवाक्यार्थः॥प्रथमप्रश्न
स्योत्तरमाह॥पवित्राणांपवित्रंपावनानांतीर्थादी
नांपरमस्तुपुमान्...तोदृष्टश्यकीर्तितःस्तुतः॥

ध्या

पद्‌तिसाधयत्स्त्रोषकार्याणिचपान्यभीप्सति॥
एवमेकाग्रचित्तःसन्संश्रितोमधुसूदनं॥ जन्ममृत्यु
जराग्राहंसंसाराब्धिंतरिष्यति॥ यथाग्निरुद्धतशि
खःकक्षंदहतिसानिलः॥ तथाचित्तस्थितोविष्णुर्यो
गिनांसर्वकिल्बिषमितिवचनात्॥ भिद्यतेहृदय
८ ग्रंथिश्छिद्यंतेसर्वसंशयाः॥ क्षीयंतेचास्यकर्माणि
तस्मिन्दृष्टेपरावरेइत्यादिस्मृतेश्चमंगलानांचमं
गलंसुखंतत्साधनंतत्प्रापकंच॥ तेषामपिपरमा
नंदलक्षणंपरंमंगलमितिमंगलानांचमंगलंदैव
तंदेवतानांचदेवानांदेवःद्योतनादिभिःसर्वोत्कर्ष

णवर्तमानत्वात्॥ भूतानांयोव्ययःपिताभूतानां
प्राणिनांव्ययरहितःपिताजनकोयोदेवःसएकं
दैवतंलोकेइतिवाक्यार्थः॥ एकोदेवःसर्वभूतेषु
गूढःसर्वव्यापिसर्वभूतांतरात्मा॥ कर्माध्यक्षः
सर्वभूताधिवासःसाक्षीचेताकेवलोनिर्गुणश्च
योब्रह्माणंविदधातिपूर्वंयोवैवेदांश्चप्रहिणोति
ह तस्मै॥ तंहदेवमात्मबुद्धिप्रकाशंमुमुक्षुर्वैशरणमहं
प्रपद्येतिश्वेताश्वतराणांमंत्रोपनिषदिश्रीसर्पदेव
तेस्तांछांदोग्ये॥ ननुकथमेकोदेवोजीवपरयोर्भे

१

दात्॥तस्य बुद्धात्त देवानुप्रा विष्टात्॥ससर्ग्ऐषइहप्रवि
ष्ट:॥प्रानखाग्रेभ्य इत्यादिश्रुति भ्यो विलत्तस्य परस्प
रु द्विरुद्धतिसाक्षीत्वेन प्रवेक्ता श्रवणाद्भेदः प्रवि
ष्टाना मित्तरे तर भेदात्॥पूर्वमे कत्व मि स्थित्त्॥नैप
क्षो देवो बहुधा संनि विष्टः॥पैकः सन्बहुधा विवष्टेत्व मेको
सि बहु नेनु प्रविष्टः इत्यैकस्यैव बहुधा प्रवेक्ता श्रवणात्
प्रविष्टानां परस्परं न भेदः हिरंण्यगर्भ इत्यष्टौ मंत्राः
कस्मै देवाय यत्पत्र एको ऽत्र लोपे न एक देव प्रत्तिपादका
स्तैत्तिरीयके॥अग्निर्यथैको भुवनंप्र विष्टो रूपं रूपं
प्रतिरूपो बभूव हि थ्य सूर्योपि था सर्व भूतस्य च क्षु

त्ति स्मृतेन बहु स्यात्ति तद्वो॥अपि पातकयुक्तोपि ध्यायं
न्निमिष मच्युतं॥भूयस्तप स्वी भवत्ति पंक्ति पावन पाव
नः॥ज्ञान तो ज्ञान तो वापि वासुदेवस्य कीर्त्तनात्॥गत
त्सर्व विलयं यात्ति तोयस्थं लवणं यथा॥मुहूर्त्त मपि यो
ध्यायेन्नारायण मतंद्रितः॥सोपि सिद्धिमवाप्नोति किं
पुनस्तत्परायणः॥यत्क्षणं यन्मुहूर्तं तत्क्षणं यन्मुहूर्तं ध्यान
वर्जिते॥दस्युभिर्मु षितेनेव युक्तमाक्रंदितुं भृशं॥यन्मु
हुर्त्तं क्षणं वापि वासुदेवो न चिंत्यते॥साहानिस्तन्महा
छिद्रं स मोहः सा विमूढता॥जनार्दनं भूतपत्तिं जग
द्गुरुं स्मरन्मनुष्यः सत्ततं महामुने॥दुःखोन्यक्तो षाण्य

तानामंतनपरन्तपः समआप्नोति विद्यातुरमानावृद्दमैक
मनुपुरुषत इति ईशावास्ये ॥ सर्वेषां भूएवाग्र आसीन्ना
न्यत्किंचनमिषत्स एकं सद्विप्रा बहुधावदंती एकं सन्तं तं
बहुधाकल्पयंतिगर एको विममेत्रिभिरित्पदेभिः एको
दाधार भुवनानि विश्वा ॥ इति ऋग्वेदे ॥ सदेव सोम्येद
१० मग्र आसीदेकमेवाद्वितीयमिति छांदोग्ये ॥ सर्वभूत
स्थितं यो मां भजत्येकत्वमास्थितः ॥ सर्वथा वर्त्तमानो
पि स योगी मयि वर्त्तते ॥ विद्याविनयसंपन्ने ब्राह्मणे ग
वि हस्तिनि ॥ इत्यादि ॥ अहमात्मा गुडाकेश सर्वभूता
शयस्थितः ॥ यदा भूतपृथग्भावमेकस्थमनुपश्यति ।
तत एव च विस्तारं ब्रह्म संपद्यते तदा ॥ यथा प्रका

शयत्येकः कृत्स्नं लोकमिमं रविः ॥ क्षेत्रं क्षेत्री तथा
कृत्स्नं प्रकाशयति भारत ॥ सर्वधर्मान्परित्यज्य मामे
कं शरणं व्रज ॥ अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा
शुच ॥ इति भगवद्गीतासु ॥ हरिरेव सदा ध्येयो भवद्भिः
सत्वसंस्थितैः ॥ ओमित्येवं सदा विप्राः पठध्वं ध्यात के
शवं ॥ आश्चर्यः सर्वदेवानामेकस्त्वं पुरुषोत्तम ॥ ध
न्यश्चापि महाबाहो लोकेनान्यश्चैनेति हरिं विना ॥ भवति कस्य
च मनो माहात्म्यख्यापनाय इति ॥ यद्वै किंच मनुरवद
त्तद्भेषजमिति ॥ मनुनाप्युक्तं ॥ सर्वभूतस्थमात्मानं सर्वभू

तानिचात्ममि॥ सपत्यग्नात्मनाडीवैः स्वाराज्यमधिग
च्छती॥ तिसृष्टिस्थित्यंतकरणाद्ब्रह्मविष्णुशिवात्मकं॥
संज्ञां याति भगवानेक एव जनार्दनः॥ तस्मान्न वि
ज्ञानमृते स्ति किंचित्क्वचित्कदाचिद्द्विजवस्तुजातं॥ वि
११ ज्ञानमेकं द्विजकर्मभेदैर्विभिन्नचित्तैर्बहुधाभ्युपेतं॥
ज्ञानं विशुद्धं विमलं विशोकमशेषलोभादिनिरस्त
संगं॥ एकं सदैकं परमं परेशं स वासुदेवो न यतोन्य
दस्ति॥ यदा समस्तदेहेषु पुमानेको व्यवस्थितः॥
तदा हि को भगवान् कोहमित्येतद्विफलं वचः॥

न लिप्यते चाक्षुषैर्बाह्यदोषैः॥ एकस्तथा सर्वभूतांतरात्मा
न॥ लिप्यते लोकदुःखेन बाह्यः॥ एको वशी सर्वभूतांत
रात्मा एकं रूपं बहुधा यः करोति॥ तमात्मस्थं येनुपश्यं
ति धीरास्तेषां सुखं शाश्वतं नेतरेषां॥ नित्यो नित्यानी
चेतनश्चेतनानां एको बहूनां यो विदधाति कामान्॥
तमात्मस्थं येनुपश्यंति धीरास्तेषां शांतिः शाश्वती
नेतरेषां॥ इति कठवल्लीषु॥ श्रुत्वा वाद्दमग्न्यासी देवकुमे
वाले क सैंस्तव्यभङ्गान्यो ता॥ स्तिइष्टानान्योता॥ स्तिश्रो
ता रसादि बृहदारण्यके॥ घनेजदेकं मनसो जवीयो नैन
द्देवा आप्नुवन् पूर्वमर्षत्॥ तत्र को मोहः कः शोक एकत्व
ओ

वसत्ति ॥ भवानहंच विश्वात्मैनेकमेवं च हि कारणं ॥
जगतोस्य जगत्यर्थे भेदेनाहं व्यवस्थितो ॥
त्वयायदभयं दत्तं तद्दत्तमभयं मया ॥ मत्तो विभि
न्नमात्मानं द्रष्टुमर्हसि शंकर ॥ योहं सत्वं जगच्चेद
१२ सदेवासुरमानुषं ॥ अविद्यामोहितात्मानः पुरुषा
भेददर्शिनः इति विष्णुपुराणे ॥ विष्णोरन्यं तु पश्यंति
ये मां ब्राह्मणमेव च ॥ कुतर्कमतयो मूढाः पच्यंते नर
केष्वधः ॥ ये च मूढा दुरात्मानो भिन्नं पश्यंति मां हरेः ॥
ब्रह्माणं च ततस्तेषां ब्रह्महत्यासमं त्वघं ॥ इति
भविष्यपुराणे महेश्वरवचनं ॥ आत्मेत्येभ्युप

पगच्छंति तथैव च ग्राहयंति च ॥ आत्मेत्येवशास्त्रो
विशेषेण ॥ परमात्मा प्रतिपत्तव्यः तथा हि ॥
परमात्मप्रक्रियायां जाबाला आत्मत्वेनैवैनमभ्यु
पगच्छंति त्वं वा अहमस्मि भगवो देवते अहं वै त्व
मसि देवते ति ॥ तथान्येपि ॥ यदेवेह तदमुत्र यदा
मुत्र तदन्विह ॥ स यश्चायं पुरुषे यश्चासावादित्ये स
एकः तदात्मानमेवावेदहं ब्रह्मास्मि स वा एष महानज
आत्माजरोमरोऽमृतोऽभयो ब्रह्मेत्येवमादयः ॥ आ
त्मोपगमाद्रष्टव्यः ॥ ग्राहयं ॥ ति चात्मत्वेनैवेश्वरं

वेदांतवाक्यानि एष त आत्मा सर्वांतरः एष त आत्मा
ंतर्याम्यमृतः यन्मनसा न मनुते येनाहुर्मनो मतं तदे
व ब्रह्म त्वं विद्धि नेदं यदिदमुपासते तत्सत्यं स आत्मा
तत्त्वमसीत्येवमादीनि ननु प्रतीकदर्शननिमित्तवि
कल्पात् इमान्यपि एवं भविष्यंति तदयुक्तं गौणत्व
९३ प्रसंगात् वाक्यवैरूप्याच्च तत्र हि प्रतीकदृष्टि
रभिप्रेयते सकृदेव तत्र वचनं भवति यथा मनो
ब्रह्मेति आदित्यो ब्रह्मेति इह पुनस्त्वमहमस्म्यहं वा
त्वमसीत्याह अतः प्रतीकश्रुतिवैरूप्यादभेद
प्रतिपत्तिः भेदप्रतिपत्तिभेददृष्ट्यपवादाच्च तथा

सितनीलादिभेदेन यथैकं दृश्यते नभः भ्रांतिदृ
ष्टिभिरात्मापि तथैकः सन्पृथक्पृथक् य एकोस्ति सम
स्तं तदिहास्ति किंचित्तदच्युतान्नास्ति परं ततोन्यत्
सोहं स च त्वं स च सर्वमेतदात्मस्वरूपं त्यज भेदमो
हं इतीरितस्तेन स राजवर्यस्तत्याज भेदं परमार्थ
दृष्टिः यमेनोक्तं सकलमिदमहं च वासुदेवः पर
मपुमान्परमेश्वरः स एकः इति मतिरचला भ
वत्यनंते हृदयगते व्रज तान्विहाय दूरात् यथा हव
सुधा सर्वसत्यमेतद्दिवौकसः ब्रह्मांडं वो भवं तथा
सर्वं नारायणात्मकं विभूतयस्तु यास्तस्य तासामे
व परस्परं आधिक्यं न्यूनता बाध्यबाधकत्वेन र

यज्ज्ञात्वानपुनर्मोहमेवंयास्यसिपांडव॥येनभूतान्य
शेषेणद्रक्ष्यस्यात्मन्यथोमयि॥क्षेत्रज्ञेश्वरैकत्वंसर्वोपि
निषत्सिद्धंद्रक्ष्यसीत्यर्थः॥सर्वभूतेषुयेनैकंभावमव्यय
मीक्षते॥अविभक्तंविभक्तेषुतज्ज्ञानंविद्धिसात्विकं॥इत्य
१४ द्वैतात्मज्ञानंसम्यग्दर्शनमुक्तंभगवता।पितस्मादा
त्मन्येवेश्वरमात्मनोदर्शीत।सिद्धार्थेपिवेदस्यप्रामाण्य
मेष्टव्यं॥स्वपक्षसाधनादिगीनुकार्यं॥अर्थमाह
चैतत्परोवेदस्त्वसतःपरात्मदृष्टभवतीत्यर्थः॥भियुक्तैरु अ
क्तं॥अन्यान्वितस्वार्थेपदानांसामर्थ्यंनकार्यान्वितस्वा
र्थे॥तथासत्यर्थवादपदानामनन्वयप्रसंगात्॥अ

न्वयपबुद्धेस्स्मृतित्वान्नहिभवतिवापूर्वाभिलभेतक्षे
पिष्टःआलभेतेतिरागस्यप्रवर्तकत्वंननियोग
स्य॥तथाचश्रुतिः॥अथोखल्वाहुः॥काममयएवा
यंपुरुषइतिसयथाकामोभवतितथाक्रतुर्भवति
तत्कर्मकुरुतेयत्कर्मकुरुतेतदभिसंपद्यते॥तथा
चस्मृतिरपि॥अकामतः॥क्रियाकाचिद्दृश्यतेनेहकु
र्हिचित्॥यद्यद्धिकुरुतेकिंचित्तत्कामस्यचेष्टितं॥
कामएषक्रोधएषरजोगुणसमुद्भवः॥इतिच॥
अन्यपराणामपिमंत्रार्थवादानांप्रामाण्यमंगीकर्त
व्यं॥तेषामप्रामाण्यकथनेनोरगत्वंगतवान्नहुषः

कथं ऋषयस्तु परिभ्रांता बाध्यनाद्दुरात्मना ॥ देवर्षयो
महाभागास्तथा ब्रह्मर्षयोमलाः ॥ पपृच्छुः संशयं तेत्तु [पप्रच्छुः]
नहुषं पापचेतसं ॥ य इमे ब्राह्मणाः प्रोक्ता मंत्रा वै प्रोक्ष
णे गवां ॥ एते प्रमाणं भवतउताहो नेति वासव ॥ नहु
षो नेति तानाह सहसा मृत्युचेतनः ॥ ॥ ऋषय उः ॥
१५ अधर्मे संप्रवृत्तस्त्वं धर्मं च विद्धि पृच्छसि ॥ प्रमाणमे
तदस्माकं सर्वं प्रोक्तं महर्षिभिः ॥ ॥ अगस्त्य उ० ॥ ततो
विवदमानः स नऋषिभिः सह पार्थिवः ॥ अथैनानस्पृ
शन्मूर्ध्नि पादेनाधर्मपीडितः ॥ तेनाभूद्धततेजाः स
निःश्रीकश्च शचीपतिः ॥ ततस्तमाहूमा विग्नमवो
चं भयपीडितं ॥ यस्मात्पूर्वैः कृतं मार्गं महर्षिभिरनुष्ठितं ॥

हि ॥ अथ योन्यां देवतामुपास्ते अन्योसावन्योहमस्मी
ति न स वेद यथा पशुः ॥ मृत्योः स मृत्युमाप्नोति य इह
नानेव पश्यति ॥ यथोदकं दुर्गे वृष्टं पर्वतेषु विधावति ॥
एवं धर्मान्पृथक्पश्यंस्तानेवानुविधावति ॥ द्वितीया
द्वै भयं भवति ॥ य एतस्मिन्नुदरमन्तरं कुरुते
अथ तस्य भयं भवति तत्त्वेव भयं विदुषो मन्वानस्य ॥
सर्वं तं परादाद्योन्यत्रात्मनः सर्वं वेद ॥ एवमाद्यभूय
स्यः श्रुतयः भेददर्शनमपवदंति ॥ आत्मैवेदं सर्वं आत्मा
नि विज्ञाते सर्वमिदं विज्ञातं भवति ॥ इदं सर्वं यद
यमात्मा ब्रह्मैवेदं सर्वमिति श्रुतिः ॥ [illegible]यास्मृतिरपि ॥

तीयनद्य स्यायन्पूर्वेयैत्यायस्तेपराबभूवुः स्तदुक्तं
मृषिणा ॥ प्रजाहत्तिस्रोअत्यायमीयुन्यान्यर्कमभि
तोविविश्रे ॥ वृहद्धतस्थौ भुवनेष्वंतःपवमानोह
रितआविवेशेति ॥ प्रजाहतिस्रोअत्यायमीयुरि
तियोवैताइमाःप्रजास्तिस्रोअत्यायमायस्तानिमा
निवयांसिवंगावगधाश्चेरपादाइतिश्रुतंवंगावन
१८ गावृक्षाअवगधाओषधयइनपादाअपादानर्थो
ईर्ष्यावास्येत्यरिद्दनिर्देशोमंत्रः ॥ असुर्यानामतेलो
काअंधेनतमसावृताः ॥ तांस्तेप्रेत्याभिगच्छंतियेकेचा
त्महनोजनाइतितेतिरीयकेच ॥ असन्नेवसभव

ति ॥ असद्ब्रह्मेतिवेदचेदिति तथाआकुंतलोपाख्या
नेच ॥ योन्यथासंतमात्मानमन्यथाप्रतिपद्यते ॥
किंतेननकृतंपापंचौरेणात्मापहारिणेति सहस्र
नामजपस्यानुरूपंस्नानमुच्यते ॥ यस्मिन्देवाश्चवे
दाश्चपवित्रंकृत्स्नमेकतः ॥ ब्रजेतन्मानसंतीर्थंय
स्मिन्स्नात्वामृतोभवेत् ॥ ज्ञानह्रदेज्ञानजलेरागद्वे
षमलापहेयःस्नातिमानसेतीर्थेसयातिपरमांग
तिं ॥ आत्मानदीसंयमतोयपूर्णासत्यह्रदाशील
तटादयोर्मिः तत्राभिषेकंकुरुपांडुपुत्रनवारिणा

ऋध्य त्तिष्यांतरात्मा इति महाभारते ॥ मानसं विष्णुचिं
तनमिति विष्णुस्मृतौ ॥ जाप्येनैव तु संसिध्येत्ब्राह्मणो
नात्र संशयः ॥ कुर्यादन्यन्नवा कुर्यान्मैत्रो ब्राह्मण उच्य
तेति मानवं वचनं ॥ यज्ञानां जपयज्ञोस्मीति भगव
द्गीतासु ॥ अपवित्रः पवित्रो वा सर्वावस्थां गतोपि
१७ वा ॥ यः स्मरेत्पुंडरीकाक्षं स बाह्याभ्यंतरः शुचिरिति च ॥
तथाव्रह रिवंशे कैलासयात्रायां महेश्वरवचनं ॥
आदिस्त्वं सर्वभावानां मध्यमंतस्तथा भवान् ॥ त्वत्तः
सर्वमभूद्विश्वं त्वयि सर्वं प्रलीयते ॥ अहं त्वं सर्व
गो देव त्वमेवाहं जनार्दन ॥ आवयोरंतरं नास्ति

त्वमदुष्टदूषयसि वै देव मूर्ध्नि स्पृष्टं प्रदा ॥ यद्यपि त्व
मृषीन्मूढ ब्रह्मकल्पाद्दुरासदान् ॥ वाहानुत्वा वाहय
सि तेन स्वर्गाद्भ्रंशितः प्रभः ॥ ध्वंसपाप रिन्नवः क्षीणपुण्य
महीतले ॥ दशवर्षसहस्राणि सर्परूपधरो महीं
विचरिष्यसि तीर्णत्वं पुनः स्वर्गमवाप्स्यसि ॥ दृष्ट्वा य
धिष्ठिरं नाम तव वंशसमुद्भवमिति ॥ महाभारते ॥
अतः श्रद्धेयमात्मज्ञानं ॥ अश्रद्धधानाः पुरुषा धर्मस्या
स्य परंतप ॥ अप्राप्य मां निवर्तंते मृत्युसंसारवर्त्मनी
ति भगवताप्युक्तं ॥ ऐतरेयके च एष पंथा ॥ एतत्क
र्मैतत्त्वं ॥ ब्रह्मतत्सत्यं तस्मान्न प्रमाद्येत् ॥ तन्ना

यतः यस्मात्सर्वाणि भूतानि भवंति उद्भवंति आ
दियुगागमे कल्पादौ ॥ यस्मिंश्च प्रलयं ति विनाशं
यांति ॥ पुनर्भूयएवेत्यवधारणार्थः ॥ नान्यस्मि
न्नित्यर्थः युगक्षये महाप्रलये चकारान्मध्येऽपि
१८ तिष्ठंति ॥ यतो वा इमानि भूतानि जायंत इति
श्रुतेः ॥ तस्य लोकप्रधानस्येति ॥ तस्यैव लक्षि
तस्य एकस्य देवतत्तस्य लोकस्य प्रधानस्य लो
कनहेतुभिः प्रतिपाद्यस्य जगन्नाथस्य जग
तो नाथः स्वामी मायाशबलः परमात्मा तस्य
हे भूपते विष्णोर्व्यापनशीलस्य नाम्नां सहस्रं

अशुभं कर्मेहितं भयं संसारलक्षणं पापं भयं
चापहंती ॥ ति पापभयापहं मे मत्तः शृणु एका
ग्रमना भूत्वावधारय ॥ एकस्यैव समस्तस्य ब्रह्म
णो द्विजसत्तम ॥ नाम्नां बहुत्वं लोकानामुपका
रकरं शृणु ॥ निमित्त भक्तपानाम्नां भेदिन्यस्तदु
दीरणात् ॥ विभिन्नान्यवसिध्यंति फलानि द्वि
जसत्तम ॥ यच्छक्तिर्नियतस्यतस्मिन्नेव च व
स्तुनि ॥ साधकं पुरुषव्याघ्र सौम्यक्रूरेषु वस्तु
षु इति विष्णुधर्मवचनात् ॥ यद्वा पिपरस्य ब्रह्म

ण॰ षष्ठी गुणक्रियाजातिरूढीनां शब्दप्रवृ
त्तिहेतूनां निमित्तशब्दादीनां चासंभवः तथा
पि सगुणे ब्रह्मणि सविकारे सर्वधर्मित्वात्तेषां
वृ शब्दप्रवृत्तिहेतूनां संभवात् ॥ सर्वे शब्दाः परस्मि
१९ न्पुंसि वर्तंते तत्र नामानि गौणानि गुणयोगा
त्प्रवृत्तानि तेषु च यानि च विख्यातानि प्रसिद्धा
नि ऋषिभिर्मंत्रैस्तद्वारैभिश्च परिगीतानि ।
भूतये पुरुषार्थचतुष्टयसिद्धये ॥ महात्मनां सा
वात्मेति ॥ यच्चाप्नोतिपदादत्ते [illegible] विषयानिह ॥
(पञ्चाप्ति)

शेद्धर थैं जगत्रये ॥ नामानि तव गोविंदयानि लो
के महांतिच ॥ तान्येव मम नामानि नात्र कार्या विचा
रणा ॥ त्वदुपासा जगन्नाथ सैवास्तां मम गोपते ॥
यश्च त्वां द्वेष्टि ते गोप स मां द्वेष्टि न संशयः ॥ त्वद्दिस्ता
राय तो देवा अहं भूतपतिस्ततः ॥ न तदस्ति यतो
देव पश्यो विरहितः क्वचित् ॥ यदासीद्वर्तते पत्र यच्च भा
वि जगत्पते ॥ सर्वं त्वं देवदेवेश विना किं चित्त्वया हि या
दिवाक्यानि एकत्वप्रतिपादकानि ॥ ॥ यदेकं दैव
तं प्रस्तुतं तस्योपलक्षणमुच्यते यतः सर्वाणीति ।

चैतन्यमेव । स्थितः ज्योतींषि विष्णुर्भुवनानि विष्णु
र्वनानि विष्णुर्गिरयो दिशश्च नद्यः समुद्राश्च
स एव सर्वं यदस्ति यन्नास्ति च विप्रवर्य इति
विष्णुपुराणे ॥ आदित्यानामहं विष्णुरित्याद
ते भ्य अथवा बहुनै[illegible]न किं ज्ञातेन तवार्जुन ।
२० विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जग
दित्यंतेन गीतोपनिषदि भगवतैवोक्तं । ब्र
ह्मैवेदं विश्वमिदं वरिष्ठं । पुरुष एवेदं सर्वं
विश्वं कर्म तपो ब्रह्म परामृतमित्यादिश्रुते
श्च विश्वादिशब्दानां पुनरुक्तानामपि वृत्ति

भेदादर्थभेदान्न पौनरुक्त्यं । श्रीपतीमधि
वइत्यादीनां वृत्त्यैकत्वेपि शब्दभेदान्न पौनरु
क्त्यं दोषायार्थैक्यपौनरुक्त्यं न दोषय । ना
म्नां सहस्रस्य । किमेकं दैवतं [illegible]ति पृष्टे एकदै
वतविषयत्वात् । यत्र पुं[illegible] । लिंगनामशब्दप्र
योगस्तत्र विष्णुर्विशेष्यः यत्र स्त्रीलिंगशब्द
प्रयोगस्तत्र देवता विशेष्यते । यत्र नपुंस
कलिंगशब्दप्रयोगस्तत्र ब्रह्म विशेषणीयं ।
यतः सर्वाणि भूतानीत्यारभ्य जगदुसत्ति

।स्थितिलयकारणस्य च ब्रह्मण एकदेवत
त्वेनाभिहितत्वात् आदावुभयविधं ब्रह्म वि
श्वशब्देनोच्यते॥ विश्वरूपं जगतः कारणत्वे
श्री न विश्वमित्युच्यते ब्रह्म त्वादौ विश्वमिति
२१ कार्यग्रहणेन कारणग्रहणं कार्यभूतविरिं
च्यादीनामपि उपपन्ना स्तुतिर्विष्णुरिति द
र्शयितुं यद्वा परस्मात्पुरुषान्न भिन्नमिदं विश्वं
परमार्थतस्तेन विश्वमित्यभिधीयते ब्रह्म। ब्र
ह्मैवेदं विश्वमिदं वरिष्ठं पुरुष एवेदं विश्वमेव
देमित्यादिश्रुतेः॥ तद्भिन्नं किंचित्परमार्थतः सद

यद्यास्य संततो भावस्तस्मादात्मेति कीर्त्यत इति
वचनात्॥ अयमेव महानात्मेति माहात्म्यात्त
स्याचिन्त्यप्रभावस्य तान् विश्वाभिभूतये पुरु
षार्थचतुष्टयसिद्धये पुरुषार्थचतुष्टयार्थिना
मिति॥ अत्र नामसहस्रे आदित्यादिष्वद्धानाम
र्थं तत्र प्रसिद्धानामादित्याद्यर्थानां तद्विभूति
त्वेन तदभेदात्तस्यैव स्तुतिरिति प्रसिद्धार्थ
ग्रहणं पिस्तुतित्वं। भूतात्मा चेन्द्रियात्मा च प्रधा
नात्मा तथा भवान्॥ आत्मा च परमात्मा च त्वमेकः
पंचधा नात्मा तथा भवान्॥ आत्मा च परमात्मा

पुनरेतंत्रिमात्रमोमित्येतेनैवाक्षरेणपरंपुरुषमभि
ध्यायीत।ॐमितिब्रह्मॐमितीदंसर्वंतद्यथा
शंकुनासर्वाणिसंतृणान्येवमोंकारेणसर्वावाक्
संतृणा।ॐकारएवेदंसर्वंॐकारएवेदंसर्वं
मिति।ॐमित्येतदक्षरमिदंसर्वंमित्युपक्रम्यप्रण
२२ वोह्यपरंब्रह्मप्रणवश्चपरःस्मृतः।अपूर्वोनितरोबा
ह्योनपरःप्रणवोव्ययः।सर्वस्यप्रणवोह्यादिर्मध्य
मंतस्तथैवच।एवंहिप्रणवंज्ञात्वाव्यश्नुतेतदनंत
रं।प्रणवंहीश्वरंविद्यात्सर्वस्यहृदयेस्थितं।
सर्वव्यापिनमोंकारंमत्वाधीरोनशोचति।अमा
त्रोनंतमात्रश्चद्वैतस्योपशमःशिवः।ॐकारो

विदितोयेनसमुनिर्नेतरोजनइत्यंतामांडुक्यो
पनिषत्।ॐतद्ब्रह्मॐतद्वायुःॐतदात्माॐ
तत्सत्यंॐतत्सर्वंॐतत्पुरोर्नमइत्यादिश्रुति
भिः।ॐमित्येकाक्षरंब्रह्मव्याहरन्मामनुस्मरन्।
रसोहमप्सुकौंतेयप्रभास्मिशशिसूर्ययोः।
प्रणवःसर्ववेदेषुशब्दःखेपौरुषंनृषु।महर्षीणां
भृगुरहंगिरामस्म्येकमक्षरं।आद्यंहित्र्यक्षरंब्रह्म
त्रयीयस्मिन्प्रतिष्ठिता।एकाक्षरंपरंब्रह्मप्राणा
यामःपरंतपः।ॐकारःस्वर्गद्वारंतस्माद्ब्रह्माध्य
यमाप।एतदादिप्रतिपद्यतेविद्यावातद्विदे

वलौ किंकोवाचोत्सावर्त्तेति॥प्रणवाद्यय यावेदाःश्रप
चपर्पवास्थिताःवाङ्मयंप्रणवःसर्वंतस्मात्प्रणव
मभ्यसेदित्यादिस्मृतिभिश्च॥विश्वक्ताद्धेनोंकाराप्य
भीधीयते॥सर्वंखल्विदंब्रह्मवाच्यवाचकयोरत्यंत
२३ भेदाभावत्॥विश्वमितोंकारएवेब्रह्मेत्यर्थः॥त
ज्जलानि॥तिशान्तउपासीतेति॥ एतदुक्तंभवति
यस्मात्सर्वमिदंविकारजातंब्रह्मतत्त्वाद्यात्तल्लय
त्वात्तदयेनत्वाद्येनचसर्वस्यैकात्म्येत्वेरागादयःसं
भवंतितस्मात्शांतउपासीतेतिश्रुतेः॥श्रूयतांधर्म
सर्वस्वंश्रुत्वाचैवावधार्यतां॥आत्मनःप्रतिकूला

स्ति॥अथवाविशतीतिविश्वंब्रह्म॥तत्सृष्ट्वातदेवानु
प्रविशदितिश्रुतेः॥किंचसंहृतौविशांतिसर्वाणिभू
तान्यस्मिन्निति विश्वंब्रह्मब्रह्माणिप्रपंच्यभिसं
विशांतीतिश्रुतेः॥तथाहिसर्वेलिंगलकार्यभूतमे
षविशतित्यत्राखिलंविशतीति॥उभयथापिविश्वंब्रह्मे
तिश्रुतेःनचिकेतःमृत्युंपृष्टवानन्यत्रधर्मादन्यत्राध
र्मादित्यारभ्यसर्वेवेदायत्पदमामनंतितपांसिसर्वा
णिचयद्वदंतियदिच्छंतोब्रह्मचर्यंचरंतितत्तेपदंसंग्र
हेणप्रवक्ष्येओमित्येतत्॥एतद्ध्येवाक्षरंब्रह्मएतद्ध्येवा
क्षरंपरं॥एतद्ध्येवाक्षरंज्ञात्वायोयदिच्छतितस्यतत्॥
यतद्धेसत्यकामपरंचापरंब्रह्मयदोंकारइत्युपक्रम्ययः

द्रष्टत्वमात्मेव तस्माद भेदेन विचक्षणै: समुत्सृ
ज्यासुरं भावं तस्माद्युयं तथा वयं ॥ तथा
यत्नं करिष्यामो यथा प्राप्स्याम निर्वृतिं ॥ सर्वत्र दै
त्या: समतामुपेयत समत्वमाराधनमच्युतस्या
२४ नमंत्रादिकृतस्तातनचनैसंगिकोमम ॥ भावए
ष हिंसासान्यायस्पस्पादच्युतोदृदि ॥ अन्येषां
योऽल्पपानानि चिंतयत्पात्मनोयथा ॥ तस्यपाया
गमस्तात्यहेत्वभावान्नविद्यते ॥ कर्मणामनवाच्य
परपीडांकरोतियः ॥ तद्वीजजन्मफलति प्रभूतं
तस्यचाशुभं ॥ सोहंनपापमिच्छामिनकरोमि

ऽदामिवा ॥ चिंतयन्सर्वभूतस्थमात्मन्यपिच
केशवं ॥ शारीरंमानसंदुःखंदैवंभूतभवंतथा ॥
सर्वत्रसमचित्तस्यतस्यमेजायतेकुतः ॥ एवंस
सर्वेषुभूतेषुभक्तिरव्याभिचारिणी ॥ कर्त्तव्यापंडि
तैर्ज्ञात्वांसर्वभूतमयंहरिं ॥ सामचोपप्रदानंचभे
ददंडौतथापरौ ॥ उपाया:कथितास्चैतेमित्रादीनां
चसाधने ॥ तामेवाहंनपश्यामि मित्रादीन्तातमा
ऽध्य ॥ साध्याभावेमहाबाहोसाधनै:किंप्रयोजनं ॥
सर्वभूतात्मकेतातजगन्नाथेजगन्मये ॥ परमा
त्मनिगोविंदेमित्रामित्रकथाकुतः ॥ ९ ॥ उडामा

मविवेकानामक्षराणामपि प्रभो॥भोग्य भोग्या
निराड्या।निसत्य नित्तिमतामपि॥२॥तस्माद्युत
तपुण्येषु यइच्छेन्महती।श्रियं॥यत्तिसर्व्वंसमस्तेय
निर्वाणमपिचेच्छत्तः॥३॥देवामनुष्याःपश्रवः
२५
पाक्षिवृक्षसरीसृपाः॥रूपमेतदनंतस्यवि
ष्णोर्भिन्नमिव।स्थितं॥ए॥तद्विज्ञानता सर्वंज
॥स्थावरजंगमं॥द्रष्टव्यमात्मावद्विष्णुर्यतोयं
विश्वरूपधृक्॥५॥एवंज्ञानतःसभवावानंनं
तःपरमेश्वरः॥प्रसीदत्यच्युतस्तस्मिन्प्रस

निपरषांनसमाचरेत्॥त्यात्मौ यम्मन्सर्व्वत्रसं
मंपश्यतियोर्जुन॥सुखंवायदिवादुःखंसयोगी
परमोमतः॥॥निर्गुणःपरमात्मात्रदेहांत्तेव्याप्य
तिष्ठति॥तमहंज्ञानविज्ञेयंनावमन्येनलंघये
पद्या॥मैर्नीविज्ञेयंतमहंभूतभावनं॥क्रमयेत्वा
गिरयेमंहन्नुमानिवसागरं॥बद्धवैराणिभूतानि
द्वेषंकुर्वंतिचेत्ततः॥शोच्यान्यहोतिमोहेनव्याप्ता
नीतिमनिषिणः॥यतेभिन्नदृशांदैत्याःविकल्पाः
कथितामया॥कृत्वाभ्युपगमंतत्रसंक्षेपःश्रूयत्तां
मम॥विस्तारःसर्वभूतस्यविष्णोर्विश्वमिदंजगत्॥

न्नो कुत्रासंक्षयः ॥ ओंकार हिरण्यगर्भौ हरेर्भिन्नौ
विनिर्नमंतव्यं ॥ विलोर्म्यं तु परेश्य तिपमांब्रह्मापा
मवच ॥ कुतर्कमतयः पापाः पच्यंते नरकेष्वथ ॥
ये च मूढा दुराद्दुरात्मानो भिन्नं जानंति मां हरे ॥ ब्र
ह्माणं च सदा तेषां भ्रूणहत्यासमं त्वघं ॥ इति
भविष्यत्पुराणे महेश्वरवचनात् ॥ बहूनां जन्म
नामंते ज्ञानवान्मां प्रपद्यते ॥ वासुदेवः सर्वमि
ति स महात्मा सुदुर्लभः ॥ इत्यादिवचनैश्च हिंसा
विरहितेन स्कंधतिनमस्कारादि कर्तव्यमिति दर्शीयतुं
विश्वरूपेन ब्रह्माभिधीयत इति वा ॥ मत्कर्मकृन्मत्परमो

मद्कः संगवर्जितः॥ निर्वैरः सर्वभूतेषु यः समो मे
ति पांडवेति॥ न चलति निजवर्णधर्मतो यः सममि
तिरात्मसुहृद्विपक्षपक्षे॥ न हरति न च हंति किंचिदु
च्चैः सितमनसं तमवेहि विष्णुभक्तं॥ विमलमतिरम
त्सरः प्रशांतः शुचिचरितोखिलसत्वमित्रभूतः॥
२८ प्रियहितवचनोस्तमानमायो वसति सदा हृदि त
स्य वासुदेवः॥ सकलमिदमहंच वासुदेवः परमपुमान्परमे
श्वरः स एकः इति मतिरचला भवत्यनंते हृदयगते व्रज तान्वि
हाय दूरात् यमनियमविधूतकल्मषाणामनुदिनमच्युतस
क्तमानसानां॥ अपगतमदमानमत्सरा
णां व्रज भट दूरतरेण मानवानां॥ इत्यादिक

स्कारादि॥ असदिदित्युच्यते पार्थ न च तत्प्रेत्य नो इह इत्यादि
स्मृतिभिश्च श्रद्धया स्तुतिनमस्कारादि कर्त्तव्यं अश्रद्धया नेति॥
ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृत इति भगवद्व
चनात्॥ स्तुतिनमस्कारादिकं कर्म सात्विकं विगुणमपि
श्रद्धापूर्वकं ब्रह्मणोभिधानत्रयप्रयोगे सगुणं सात्विकं सं
२७ पादितं भवति। आत्मानं विष्णुध्यानार्च्चप्रयोगे सगुणं सा
नं स्तुतिनमस्कारादि कर्त्तव्यं॥ नाविष्णुः कीर्तयेद्विष्णुं नावि
ष्णुर्विष्णुमर्चयेत्॥ नाविष्णुः संस्मरेद्विष्णुं नाविष्णुर्विष्णुमा
प्नुयात्॥ इति महाभारते कर्मकांडे। सर्वाण्येतानि नामानि प
रस्य ब्रह्मणो नघ॥ सर्वान्कामानवाप्नोति समाराध्य जग

द्गुरुं॥ तन्मयत्वेन गोविंदमित्येतदाल्पनान्यथा॥ त
न्मयो वा स्थितान्कामान्प्रदवाप्नोति मानवः॥ इति विष्णु
धर्मे॥ सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः॥ स
र्वथा वर्त्तमानोपि स योगी मयि वर्त्तते इति भगवद्गीतासु॥
अहं हरिः सर्वमिदं जनार्दनो नान्यत्ततः कारणकार्यं
जातं॥ ईदृङ्मनो यस्य न तस्य भूयो भवोद्भवा द्वंद्वगदा भ
वंति इति विष्णुपुराणे॥ गुरोर्यत्र परीवादो निंदा वापि
प्रवर्त्तते॥ कर्णौ तत्र पिधातव्यौ गंतव्यं वा ततोन्यतः॥
तस्माद्ब्रह्मैवाचार्यरूपेण स्वरूपेण वा तिष्ठतीवास स्मृतो॥
वरं कुतवहज्वालापंजरांतर्व्यवस्थितिः न शौरिचिंता

विमुखजनसंवासः इष्यतः इति कात्यायनवचनात् ॥ यत्र दे
शे श्रीवासुदेवनिंदा तत्र वासो न कर्तव्यः ॥ एतदुक्तं भवति ॥
यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ॥ तस्यैते कथिता ह्य
र्थाः प्रकाशंते महात्मन इति श्वेताश्वतरोपनिषन्मंत्रवर्णा
द्धरौ गुरौ च परा भक्तिः कार्येति ॥ अवशेनापि यन्नाम्नि कीर्त्ति
२८ ते सर्वपातकैः ॥ पुमान्विमुच्यते सद्यः सिंहत्रस्तैर्मृगैरिव ॥
अज्ञानतो ज्ञानतो वा वासुदेवस्य कीर्तनात् ॥ तत्सर्वं वि
लयं याति तोयस्थं लवणं यथा ॥ कलिकल्मषमत्युग्रं नरका
र्तिप्रदं नृणां ॥ प्रयाति विलयं सद्यः सकृद्यत्र च संस्मृते ॥
सकृत्स्मृतोऽपि गोविंदो नृणां जन्मशतैः कृतं ॥ पापराशिं

क्षणो वैष्णवलक्षणस्य एवं प्रकारत्वाच्च हिंसादिरहितेन वि
ष्णोः स्तुतिनमस्कारादिकं कर्तव्यमिति ॥ श्रद्धयादेयं नाश्रद्धया
श्रद्धयाभिःस मिथ्यते इत्यादिश्रुतेः ॥ श्रद्धापूतं वदान्यस्य हतम
श्रद्धयेतरत् ॥ इमं स्तवमधीयानः श्रद्धाभक्तिसमन्वितः ॥
अश्रोत्रियश्राद्धमधीतमव्रतमदक्षिणां यज्ञमनृत्विजां कु
तं ॥ अश्रद्धया दत्तमसंस्कृतं हविर्भागाः षडेते तव दैत्यस
त्तम ॥ पुण्यं मद्द्विषिणां यज्ञमश्रद्धेद्द्विषिणां तथा ॥ क्रय
विक्रयसक्तानां पुण्यं यच्च निहोत्रिणां ॥ अश्रद्धया च यद्दानं
दत्तं यज्वतां तथा ॥ तत्सर्वं तव दैत्येंद्र मत्प्रसादाद्भवि
ष्यति ॥ अश्रद्धया कृतं दत्तं तपस्तप्तं कृतं च यत् ॥ स्तुतिनम

ध्याय तित्तद्धाचावदती तिष्णुतिष्यां स्मरणं ध्यानंचना
मसंकीर्तनांतश्रुतेय। स्मिन्न्यस्तमतिर्न याति नरकं स्वर्गो
पिय च्चिंतने विघ्नो यत्र निवेशितात्ममनसो ब्राह्मो पि लो
को ल्पकः ॥ मुक्तिं चेतसि यः स्थितो मल धियां पुंसां द
दात्यच्युतः ॥ किं चित्रं यदघं प्रयाति विलयं तत्राच्युते
२१ की र्तिते इत्येवं विष्णुपुराणांते श्रीपराशरेणोपसंहृतं ॥
आलोड्य सर्वशास्त्राणि विचार्य च पुनः पुनः ॥ इदमेकं
सु निष्पन्नं ध्येयो नारायणः सदा महाभारतांते च भग
वता वेदव्यासेनोद्धृतं ॥ हरिरेकः सदा ध्येयो भवद्भिः
सत्वसंस्थितैः ॥ ॐ मित्येवं सदा विप्राः पठध्वं ध्यातके

शवमिति ॥ श्रीहरिवंशे कैलासयात्रायां हरिरेको ध्यात
व्य इत्युक्तं महेश्वरेणापि नाराये तियस्यास्येव वर्त्तिना
म मंगलं ॥ नारायणस्समन्वेति वत्सं गौरिव वत्सला
यतस्सर्वमभिप्रत्येष मे सर्वधर्माणां धर्मोधिकतरो
मत इत्यादी वचनं च ॥ लोके किमेकं दैवतं किंवाप्येकं पर
यणं ॥ यतः सर्वाणी तियद्भलोकंत द्विपकोद्धेनास्त
मिति व्याख्यातं ॥ तात्त्वि मित्याकांक्षायामाह विष्णु
रिति ॥ तथा च ऋग्वेदे ॥ अस्य जानंतो नाम चिद्विवक्तन
महस्ते विष्णो सुमतिं भजामहे इत्यादिमंत्रे विष्णो

नमिसंकीर्त्तनं सम्यक्ज्ञानप्राप्तये विहितं॥ वेवेष्टि व्या
प्नोतीति विष्णुः॥ विषेर्धातोर्व्याप्त्यभिधायिनः स्नु
प्रत्ययांतस्य रूपं विष्णुरिति॥ देशकालवस्तुपरि
च्छेदशून्य इत्यर्थः॥ यच्चांतर्बहिश्च तत्सर्वं व्याप्य नारायण
२० स्थित इत्यादिव्याप्तिश्रुतेः॥ विशेस्तु वा स्नुप्रत्ययांतस्य रूपं
विष्णुरिति॥ यस्माद्विष्टमिदं सर्वं तस्य महात्मनः॥ तस्मा
देवोच्यते विष्णुर्विशेर्धातोः प्रवेशनादिति विष्णुपुराणे॥
व्याप्य मे रोदसी पार्थ कांतिश्चाभ्यधिका स्मृता॥ क्रमणा
च्चाप्यहं पार्थ विष्णुरित्यभिसंज्ञितः॥ इति महाभारते॥ २॥
यदुद्देशेन यज्ञेषु क्रियासु वषट्कारः॥ यस्मिन्यज्ञे

दहत्याशु तूलराशिमिवानलः॥ सेयं वदनवल्मीकवासि
नी रसनोरंगी॥ या न गोविंद गोविंद गोविंदेति भाषते॥
पापवल्मीकरवे तस्य जिह्वारूपेण तिष्ठति॥ यानवक्ति दिवा
रात्रौ गुणान्गोविंदसंश्रितान्॥ सकृदुच्चरितं येन हरिरित्य
क्षरद्वयं॥ बद्धः परिकरस्तेन मोक्षाय गमनं प्रति॥ एको पि कृ
ष्णस्य कृतः प्रणामो दशाश्वमेधावभृथेन तुल्यः॥ दशाश्व
मेधी पुनरेति जन्म कृष्णप्रणामी न पुनर्भवाय इत्यादिवचनैः॥
श्रद्धाभक्त्योरभावेपि नामसंकीर्त्तनं समस्तसगस्तदुरितं नाश
यतीति किमु वक्तव्यं सहस्रनामसंस्मरणं नाशयतीति॥
मनसा वा प्रेमसंकल्पयति अथ वाचा व्याहरति यद्धि मनसा।

गुणमधिष्ठाय भूतानि बिभर्ति पाति धारयति पोषय
तीति वा भूतभृत् ॥६॥ प्रपंचरूपेण भवतीति केव
लं भवत्येवेति वा भावः ॥ भवनं भावः सत्तामात्रो वा
भावः ॥७॥ भूतानामात्मान्तर्यामीति भूतात्मा एष
त आत्मान्तर्यामीति श्रुतेः ॥ भूतानि भावयति जनय
तीति भूतभावनः ॥ वर्धयतीति वा ॥८॥ भूतकृदादि
३९ भिर्गुणात्तत्त्वं प्राप्तं प्रतिषिध्यते ॥ पूतात्मेति ॥ पूत आ
त्मा यस्य सः पूतात्मा कर्मधारयो वा केवलो निर्गुणश्चेति
श्रुतेः ॥ गुणोपरागः स्वेच्छया सः पुरुषं प्रति कल्पयते ॥१०॥
परमश्चासावात्मा चेति परमात्मा ॥ कार्यकारण
विलक्षणो नित्यशुद्धबुद्धमुक्तस्वभावः ॥११॥

मुक्तानां परमा गतिः ॥ परमा प्रकृष्टा गतिः ॥ गन्तव्या
देवता पुनरावृत्त्यसंभवात् तद्गतस्येति मुक्तानां ग
तिः मामुपेत्य कौन्तेय पुनर्जन्म न विद्यत इति भगवद्व
चनं ॥१२॥ न विद्यते नाशोऽस्य विकारो व्ययो विनाशो वा वि
द्यत इत्यव्ययः ॥ अजरोऽमरोऽव्यय इत्यादि श्रुतेः ॥१२॥
पुरं शरीरं तस्मिन् शेत इति पुरुषः ॥ नवद्वारं पुण्यं
पुण्यमेते आविः समन्वितः ॥ व्याप्य शेते महात्मा यस्त
स्मात्पुरुष उच्यत इति महाभारते ॥ अस्तेर्व्यस्ताक्ष
रयोगात् आसीत् पुरा पूर्वमेवेति विग्रहं कृत्वा व्युत्पा
दितः पुरुषः पूर्वमेवाहमिहासमिति तत्पुरुषस्य पुरुषत्व

मिति श्रुतेः ॥ पुरुषु पुरीषु उत्कर्षं द्रा। त्रिषु स्वत्वेषु सी
दती ति ॥ यद्वा पुरूणि फलानि सुनोति रा च्छिददाती
ति वा ॥ पुरूणि भुवनानि संहारसमये रूप तिच्छ
तं करोती ति ॥ पूरणात् सादनाद्वा पूर्णत्वाद्वा पुरा
णत्वाद्वा सनातनत्वाद्वा पुरुषः ॥ पूरणात् सादनाच्चै
32 वततो सौ पुरुषोत्तम इति पञ्चमे वेदे ॥ १४ ॥ साक्षा
दव्यवधानेन स्वरूपबोधनेन क्षत्ते पश्यति सर्वमि
ति साक्षी ॥ साक्षाद्द्रष्टरि सञ्ज्ञायामि ति पाणि नि
वचनादिन्प्रत्ययः ॥ १५ ॥ क्षेत्रं शरीरं ज्ञानातीति
क्षेत्रज्ञः क्षेत्राख्यानि शरीराणि तेषु यथा

वावषट्। क्रियायां यज्ञो वै विष्णुरि ति श्रुतेः ॥ यज्ञो वै वष
ट्कारः ॥ यज्ञो वषट्कारो द्विमन्त्रात्मना देवान् प्रीणय
ती ति या वषट्कारः ॥ प्रजापतिश्च वषट्कारश्चेति दे
वता वा ॥ ३ ॥ भूतं च भव्यं च भवच्चेति भूतभव्यभवंति
तेषां प्रभुः भूतभव्यभवत्प्रभुः ॥ कालभेदमनादृत्य स
न्मात्रप्रतियोगिकमैश्वर्यमस्येति प्रभुत्वं ॥ रजोगुणस
माश्रित्य विरिंचिरूपेण भूतानि करोतीति भूतकृत्
ष्यते हरिः ॥ तमोगुणमपि ष्ठाय रुद्रात्मना भूतानि निक्षं
ति क्षिणोति हिनस्ती ति वा भूतकृदुच्यते ॥ ५ ॥ सत्व

षानेता॥ ज्ञानिनां योगक्षेमवहनादिनेति योगविदांनेता॥
अनन्याश्चिंतयंतोमामिति भगवद्वचनात्॥१९॥प्र
धानंप्रकृतिःमायापुरुषोजीवःतयोरीश्वरःप्रधा
नपुरुषेश्वरः॥२०॥नरस्यावयवाःसिंहस्यावयवा
श्चयस्मिन्लक्ष्यंतेतद्वपुर्यस्यसनरसिंहवपुः॥२१॥
३२ यस्यवक्षसिनित्यंवसतिसेश्रीःसःश्रीमान्॥२२॥
अभिरूपाःकेशाःयस्यसःकेशवःकेशाद्वोन्यतरस्या
मितिवःप्रत्ययःप्रशंसायां॥कश्चअश्चईशश्चत्रिकृ
र्त्तयःमूर्त्तयस्तेयद्वशेवर्तंतिसवाकेशवः॥कश्चई
शश्चकेशौ॥तौवशयतीतिवाकेशवःकेशीवधा
द्वाकेशवः॥यस्माद्वयेषदुष्टात्माहतःकेशीजनार्दन॥

तस्मात्केशवनाम्नात्वंलोकेगेयोभविष्यतीतिविष्णु
पुराणे॥श्रीकृष्णंप्रतिनारदवचनं॥पृषोदरादित्वात्
छद्रसाधुत्वकल्पना॥२३॥पुरुषाणामुत्तमःपुरुषोत्तमः
अत्रननिर्धारणइतिषष्ठीसमासनिषेधोनसंभवति॥
जात्याद्यपेक्षयासमर्थत्वात्॥यत्रपुंसजातिगुण
क्रियापेक्षयापृथक्क्रियतेतत्रसमर्थत्वान्निषेधःप्र
वर्त्तति॥मनुष्याणांक्षत्रियःशूरतमः॥गवांकृष्णा
गौःसंपन्नक्षीरतमा॥अध्वगानांधावन्तःशीघ्रतम
इत्यादिषु॥अथवापंचमीसमासःतथाचभगवद्वचनं॥
यस्मात्क्षरमतीतोहमक्षरादपिचोत्तमः॥अतोस्मि

लोकेवेदेचप्रथितः पुरुषोत्तमः इति ।। २४ ।। असत
श्चसतश्चैवचसर्वस्यप्रभवाप्ययौ ।। सर्वस्यसर्वदा
ज्ञानात्सर्वमेनंप्रचक्षत इतिव्यासवचनात्सर्वः ।। २५ ।।
शृणातिसकलाःप्रजाःसंहारकालेसंहरतीतिशर्वः ।। २६ ।।
निस्त्रैगुण्यतयाशुद्धत्वाच्छिवः ।। सब्रह्मासशिवः ।। सो
ऽक्षरःस्वराडित्यभेदोपदेशाच्छिवादिनामभिर्ह
रिरेवस्तूयते ।। २७ ।। स्थिरत्वात्स्थाणुः ।। २८ ।। भूता
नामादिकारणत्वेनभूतादिः ।। २९ ।। प्रलयकालेस्मि
न्सर्वंनिधीयतइतिनिधिःकर्मण्यधिकरणेचेति
किप्रत्ययःसएवनिधिर्विशेष्यतेऽव्ययइतिअ
३४

सुखं ।। तन्निवेत्तिसयोगात्ततःक्षेत्रज्ञउच्यतइति
ब्रह्मपुराणे ।। आतोनुपसर्गेकइतिकप्रत्ययः ।। क्षेत्र
ज्ञंचापिमांविद्धीतिभगवद्वचनात ।। १६ ।। सएवनक्ष
रतीतिनक्षरतीत्यक्षरः ।। अथात्वसिरूपस्यां
तस्यरूपंअक्षरइतिएवकारात् ।। क्षेत्रज्ञाक्षरयोरभेदः
परमार्थतःतत्त्वमस्यादिश्रुतेःचकाराद्व्यावहारिको
भेदःप्रसिद्धत्वप्रमाणत्वात् ।। १७ ।। ज्ञानेन्द्रियादिसर्वा
णिनिगृह्यमानसासह ।। एकत्वभावनायोगःक्षे
त्रज्ञपरमात्मनोः ।। तदवाप्ततयायोगः ।। १८ ।। योगंवि
दन्तिविचारयंतिजानंतिलभंतइतिवायोगविदःते

सर्वेश्वर इति श्रुतेः ॥ ३६ ॥ स्वयमेव भवति नापरो भा
वयतीति स्वयंभूः स एव स्वयमुद्भावितिमानवं कंचन ॥
येषामुपरि भवति यश्चोपरि भवति सः स्वयंभव
भवतीति मौनं नैवं कंचन येषामुपरि भवति यश्चोपरि
भवति सः स्वयमेव वा स्वयंभूः ॥ परिभूः स्वयंभूरिति
मंत्रवर्णात् ॥ अथवा स्वयंभूः परमेश्वरः स्वयमेव स्वतं
३५ त्रो भवति सर्वदा न परतंत्र इति ॥ परो विश्वनिव्यतृणत्स्व
यंभूरिति मंत्रवर्णात् ॥ शं सुखं भक्तानां भावयती
ति शंभुः ॥ ३८ ॥ आदित्यमंडलांतःस्थो हिरण्मयः पुरु
ष आदित्यः ॥ द्वादशादित्येषु विष्णुर्वा ॥ आदित्यानाम

हं विष्णुरिति स्मृतेः ॥ अदितेरखंडिताया अपत्यं पति
रिति वा आदित्यः अदितिर्मही ॥ अदितिं मही दे
वी विष्णुपत्नीमजूर्यामिति श्रुतेः ॥ यथा आदित्य एक
एक एव भिन्नेषु जलभाजनेषु भिन्नवत्प्रतिभास
ते एवमनेकशरीरेषु एक एवात्मा भिन्नवत्प्रतिभा
सते इत्यादित्यसाधर्म्याद्वा आदित्यः ॥ ३९ ॥ पुष्करे
णोपमिते + महानूर्जितः स्वनो नादो वा श्रुतिलक्ष
णो यस्य + (अक्षिणी यस्य स पुष्कराक्ष) ४० ॥ महास्वनः ॥
सन्महदित्यादिना समासे कृते आन्महतः समाना
धिकरणजातीययोरित्यात्वं ॥ अस्य महतो भूतस्य

निश्च सित्तमेतद्य दग्वेदं रत्पादिश्रुत्ते:॥४१॥आदि
र्जन्म निधनंनाश:तद्रूपंन विद्यतेयस्यसोनादिनि
धन:॥४२॥अनंत्तादिरूपेणविश्वंदधात्तिबिभ
र्त्तीत्ति धात्ता॥४३॥कर्मणांतत्फलानांचकर्त्तावि
धात्ता॥अनंत्तादीन्विधारकान्विशेषेणदधात्तीत्ति
२६ वा विधात्ता॥४४॥धात्तुरुत्तम इत्तिनामैकंसविशे
षण सामाना धिकरण्येनसर्वं धात्तुभ्य:पृथिव्या
दिभ्य उत्कृष्टं विधात्तु रित्यर्थ:धात्तुर्विरिंचिरुत्तमे
इत्तिनामद्वयंवाकार्यंकार्यकारणप्रपंचधारणाच्चि
द्दव धात्तुरुत्तम:॥सर्वेषामुद्भुत्तानाम त्तिशायेनोद्भुत्त

नश्वरो।निधि रित्यर्थ:॥२॥स्वच्छयासमीचीनंभवनंयस्य
संभव:॥धर्मसंस्थापनार्थायसंभवामियुगेयुगेत्तिभग
वद्वचनात्॥त्तथादुष्टविनाशाय साधुनां रक्षणायच॥
स्वेच्छयासंभवाप्येवंगर्भदु:खविवर्जित्त इत्तिच॥३१॥
सर्वेषां भोक्तृणांफलं निभावयत्ति ददात्ती त्तिवा भावन:
सर्वफलदातृत्वंफलंमत्त उपपत्ते रित्यत्रोपपादित्तं॥३२॥
प्रपंचस्याधिष्ठानत्वेन भरणाद्भर्त्ता॥३३॥प्रकर्षेणाम
हाभुत्ता निश्चयस्माज्जायंत्त इत्तिप्रभव:॥प्रकर्षेणयस्यभवो
जन्मेत्तिवाप्रभव:॥३४॥सर्वासुक्रियासुसामर्थ्यात्ति
शयात्प्रभु॥३५॥निरुपाधिकमैश्वर्यंयस्य स:ईश्वर:एष

णीयस्य वक्त्रो वंतेति स परमात्मा ॥ यस्य वा सूर्यरू
पस्य जगच्चक्षुषीति कराहृत्वादीप्ताः केशास्तन्म
यो यस्य स हृषीकेशः ॥ पृषोदरादित्वात्साधुत्वं
तथा भारतमोक्षधर्मे ॥ सूर्यचंद्रमसोः शश्व
दंशुभिः केशसंज्ञितैः बोधयन्स्वापयंश्चैव ज
३७ गदुत्तिष्ठते पृथक् ॥ बोधनात्स्वापनाच्चैव जगतो
हर्षणं भवेत् ॥ अग्नीषोमकृतैरेवं कर्मभिः
पांडुनंदन ॥ हृषीकेशोऽहमीशानो वरदो लोकभा
वन इति ॥ ४७ ॥ सर्वजगत्कारणं पद्मं नाभौ यस्य पद्मना
भः ॥ अजस्य नाभावध्येकमर्पितमिति श्रुतेः ॥ पृषोदरा

दित्वात्साधुत्वं ॥ ४८ ॥ अमराणां प्रभुः ॥ अमरप्रभुः ॥ ४९ ॥
विश्वं कर्म क्रिया यस्य स विश्वकर्मा क्रियत इति जगत्कर्म
विश्वं कर्म यस्य वा ॥ विचित्रकर्मनिर्माणशक्तिमत्त्वाद्वा
विश्वकर्मा ॥ त्वष्टृसादृश्याद्वा विश्वकर्मा ॥ ५० ॥ मननान्मनुः
